(1434) " रूप रूपक्रियायाम् " (X-चुरादिः-1933. अक. सेट्. उभ.)

अदन्तः ।

' रूपक्रिया=राजमुद्रादिरूपस्य करणम् ।

' —रूपदर्शनम् वा ' इति क्षीरस्वामी ।

रूपकः-पिका, रुरूपयिषकः-षिका, रूपयिता-त्री, रुरूपयिषिता-त्री; इत्यादीनि समस्तान्यपि रूपाणि चौरादिकगूरयतिवत् (418) ज्ञेयानि। [1]रूप्यम् , [2]रूपकम् ।

(1435) " रूष हिंसार्थः " (I-भ्वादिः-678. सक. सेट्. पर.)

" —'रूष भूषायाम्' इति सुधाकरः ।" इति सुधाकरपाठत्वेन मा. धा. वृत्तिः । '—आलेपने इत्येके ' इति धा. का. (1-86) । सि. कौमुद्यां तु स्वतन्त्रेण पठ्यते । क्षीरतरङ्गिण्याम् अयं धातुः न दृश्यते ।

रूषकः-षिका, रूषकः-षिका, रुरूषिषकः-षिका, रोरूषकः-षिका; रूषिता-त्री, रूषयिता-त्री रुरूषिषिता-त्री, रोरूषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि भौवादिकचूषतिवत् (552) ज्ञेयानि। कर्मणि क्तप्रत्यये—[A]रूषितः इति ।

(1436) " रेकृ शङ्कायाम् " (I-भ्वादिः-80. अक. सेट्. आत्म.)

" आङ्पूर्वः संशये ; ' आरेकं संशयं प्राहुः—' इति वचनात् ।" इति मा. धा. वृत्तिः ।

रेककः-किका, रेककः-किका, रिरेकिषकः-षिका, रेरेककः-किका ;

---

1. 'अचो यत्' (3-1-97) इति यत्प्रत्ययः । रूप्यम्=राजकीया द्रव्यादिरूपा मुद्रा । स्वार्थे कनि रूप्यकम् इत्यपि साधुः ।
2. 'क्वुन् शिल्पिसंज्ञयोः—' [द. उ. 3.5] इति संज्ञायां क्वुन् । यद्वाऽत्र 'लिङ्गमशिष्यं लोकाश्रितत्वात् लिङ्गस्य' इति शाब्दिकमर्यादाश्रयणात् 'संज्ञायाम्' (3-3-109) इति ण्वुलि स्त्र्यधिकारविहितेऽपि नपुंसकलिङ्गत्वं बोध्यम् । रूपकम्=अर्थालङ्कारभेदः, नाटकादि च । नाटकादौ तु बोध्ये दर्शनार्थकत्वम् , अन्यत्र मुद्रार्थकत्वमिति विशेषः ।

A. '...... खेदं च मूषसि कृपारसरूषितात्मन् ।' धा. का. 1.86.